# मॉडल प्रश्न पत्र
## कक्षा – प्रवेशिका
## विषयः– संस्कृतम् (द्वितीयपत्रम्) कोड – 95( 2)

समयः – 3:15 होराः पूर्णांकाः 80

### खण्डः – "अ"

1. वस्तुनिष्ठप्रश्नाः

(i) गीतामृतपाठानुसारेण एनम् आत्मानं न शोषयति– 1

(अ)पावकः (ब)मारुतः (स)शस्त्राणि (द)आपः

(ii) जगति एतत्त्रयं लभन्ते– 1

(अ)पापकृतः (ब)अर्थकृतः (स)पुण्यकृतः (द)भयशीताः

(iii) कः द्विर्नाभिभाषते ? 1

(अ)भरतः (ब)शत्रुघ्नः (स)रामः (द)दशरथः

(iv) शिवराज्योदये महाकाव्ये सर्गाः सन्ति– 1

(अ)63 (ब)64 (स)65 (द)66

(v) त्रयो गुणाः सन्ति– 1

(अ) कालिदासे (ब)दण्डिनि (स)भासे (द)माघे

(vi) पश्यत ! पश्यत! इति ये ऊचुः ते– 1

(अ)मित्राणि (ब)पौराः (स)काकाः (द)बालाः

(vii) 'परिव्राजकः' इत्यस्य अर्थः कः ? 1

(अ)अतिथिः (ब)संन्यासी (स)देवता (द)विप्रः

(viii) स्वर्णहंस–स्वर्णपक्षीराजकथा उद्धृता– 1

(अ)काकोलूकीयतन्त्रतः (ब)सुहृद्भेदतन्त्रतः (स)मित्रलाभतन्त्रतः(द)अपरीक्षितकारकतन्त्रतः

(ix) हंसी कति पुत्रान् अजीजनत् ? 1

(अ)पुत्रद्वयम् (ब) पुत्रत्रयम् (स) पुत्रचतुष्टयम् (द) एकं पुत्रम्

(x) मण्डूकस्य नाम आसीत्– 1

(अ)शतबुद्धिः (ब)सहस्रबुद्धिः (स)लक्षबुद्धिः (द)एकबुद्धिः

(xi) 'पति'–शब्दस्य चतुर्थीविभक्ति–एकवचनस्य रूपमस्ति– 1

(अ)पत्युः (ब)पतये (स)पत्ये (द)पत्यै

(xii) 'दा'–धातोः लोट्लकार–मध्यमपुरुष–एकवचनस्य रूपमस्ति– 1

(अ)ददासि (ब)दद (स)दत्त (द)देहि

2. रिक्तस्थानानि पूरयत–

(i) ब्रह्मचर्यमहिंसा च...................................तप उच्यते। 1

(ii) सर्वे गुणाः .....................................आश्रयन्ते। 1

(iii) रक्षितेन................. दत्तौ सशल्येन महारणे। 1

(iv) उक्ता.........................तभजा जगौ गः। 1

(v) प्रस्फुटं.................... साम्यमुपमेत्यभिधीयते। 1

(vi) विद्याधरोऽप्सरो यक्षः रक्षो..............'.. किन्नराः। 1

3. अतिलघूत्तराप्रश्नाः–

(i) शस्त्राणि किं न छिन्दन्ति ? 1

(ii) योगिनामपि अगम्यः कः ? 1

(iii) कैकयी नृपं द्वितीयं वरं किं याचितवती ? 1

(iv) 'विवेकानन्दविजयम्' इति कस्य रचना विद्यते ? 1

(v) कौत्सः किमर्थं महाराजं रघुं निकषा समागच्छत्? 1

(vi) आपत्तिकाले जनः किं न त्यजेत्? 1

(vii) ताम्रचूडः भिक्षापात्रं केन ताडयति स्म ? 1

(viii) शतबुद्ध्यादिमत्स्यकथा पंचतन्त्रस्य कस्मात् तन्त्रात् उद्धृतास्ति ? 1

(ix) स्वर्णहंसाः प्रतिषण्मासं किं परित्यजन्ति स्म ? 1

(x) कोपाविष्टमनाः कः जातः ? 1

(xi) सखि–शब्दस्य पुँल्लिंगे द्वितीयाविभक्तेः एकवचनरूपं लिखत। 1

(xii) 'चुर्'–धातोः विधिलिङ्लकारस्य मध्यमपुरुष–बहुवचनरूपं लिखत। 1

## खण्डः – 'ब'

4. तपः कतिविधम् ? नामानि लिखत । 2
5. रामः सर्वत्र कथं व्यवहरति ? 2
6. कः धर्मः सनातनः ? 2
7. केषां सर्वाणि कार्याणि केन प्रभावेण च सिद्ध्यन्ति ? 2
8. कूर्मः केन कारणेन विनष्टः? 2
9. प्रहर्षिणीछन्दसः लक्षणं लिखत। 2

10. स्रग्धराछन्दसः उदाहरणं लिखत। 2

11. रूपकालंकारस्य लक्षणं लिखत। 2

12 कारणे विद्यमाने अपि य़त्र कार्यस्याभावः कथ्यते तत्र को नामकोऽलंकारो भवति ? 2

13. गणेशस्य अमरकोशानुसारं नामद्वयं लिखत। 2

14. शिवस्य अमरकोशानुसारं नामद्वयं लिखत। 2

15. कृ–धातोः लट्–लकार–मध्यमपुरुषस्य रूपाणि लिखत। 2

16. अस्मद्–शब्दस्य षष्ठी–विभक्तेः रूपाणि लिखत। 2

## खण्डः – 'स'

17. अधोलिखितेषु द्वयोः पद्ययोः एकस्य सप्रसङ्ग– व्याख्या कार्या– (1+2=3)

(क) को न याति वशंलोके मुखे पिण्डेन पूरितः ।
मृदङ्गो मुखलेपेन करोति मधुरध्वनिम् ।।

(ख) यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं करुते लोकस्तदनुवर्तते ।।

18. अधोलिखितेषु द्वयोः पद्ययोः एकस्य सप्रसङ्ग– व्याख्या कार्या– (1+2=3)

(क) तद् ब्रूहि वचनं देवि राज्ञो यदभिकाङ्क्षितम् ।
करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते ।।

(ख) इत्थं द्विजेन द्विजराजकान्ति–रावेदितोवेदविदां वरेण।
एनोनिवृत्तेन्द्रियवृत्तिरेनं, जगाद भूयो जगदेकनाथः।।

19. अधोलिखितयोः श्लोकयोः एकस्य सप्रसङ्ग–भावार्थः लेख्यः ।(1+2=3)

(क) मामाश्रित्य स्वगुरुचरणोपासनाऽसंख्यरूपैः
श्रीकृष्णाद्यैरपि सुरवरैः साधिता नो मया तु।
इत्येवाद्याश्रम इह नरेन्द्रस्य सम्प्राप्य रूपं
सच्छिष्यत्वं स्वयमिव गतो रामकृष्णस्य तस्य ।।

(ख) यः प्रीणयेत् सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं य–
देतत्त्रयं जगति पुण्यकृतो लभन्ते ।।

20. भवती संगीता, राजकीय–प्रवेशिका–संस्कृत–विद्यालय–जयपुरस्य छात्रा । भवती रुग्णा जाता ।अतः प्रधानाध्यापकाय दिनद्वयस्य अवकाशार्थं प्रार्थनापत्रं लिखतु। 3

अथवा

भवतः ग्रामस्य समुचितविकासाय सरपंच–महोदयाय पत्रं लिखतु ।

## खण्डः –'द'

21. अधोलिखितगद्ययोः कस्यचिदेकस्य सप्रसङ्ग– व्याख्या कार्या– (1+3= 4)

(क) ततो राजा भृत्यानब्रवीत् – भो भो! गच्छत । सर्वान् पक्षिणः गतासून् कृत्वा शीघ्रमानयत । राजादेशानन्तरमेव प्रचेलुस्ते । अथ लगुडहस्तान् राजपुरुषान् दृष्ट्वा तत्र एकेन पक्षिणा वृद्धेनोक्तम्– भो! स्वजनाः न शोभनमापतितम्। ततः सर्वैः एकमतीभूय शीघ्रमुत्पतितव्यम्। तैश्च तथानुष्ठितम्।

(ख) अथ कदाचित् तत्र वने भ्रमन्नरण्यगजः समायातः । तं दृष्ट्वा तौ सिंहसुतौ द्वावपि कुपिताननौ तं प्रति प्रचलितौ यावत्, तावत्तेन शृगालपुत्रेणात्राभिहितम्– 'अहो गजोऽयं युष्मत्कुलशत्रुः । तन्न गन्तव्यमेतस्याभिमुखम् ।' एवमुक्त्वा असौ गृहं प्रधावितः। तावपि ज्येष्ठबान्धवभङ्गान्निरुत्साहतां गतौ ।

22. एकस्याः कथायाः सारांशः संस्कृतभाषायां लेखनीयः । 4

(क) काष्ठभ्रष्टकच्छपकथा

(ख) शतबुद्ध्यादिमत्स्यकथा

23. कमप्येकं विषयमवलम्ब्य शतपदेषु निबन्धं लिखत– 4

(क) महाराणा प्रतापः

(ख) कालिदासः

(ग) संस्कृतदिवसः